# somastotraM

# સોમસ્તોત્રમ્

## Document Information

Text title : somastotram

File name : somastotram.itx

Category : navagraha, stotra

Location : doc_z_misc_navagraha

Transliterated by : KSR Ramachandran ramachandran_ksr at yahoo.ca

Proofread by : KSR Ramachandran ramachandran_ksr at yahoo.ca

Description-comments : From Grantha/Tamil book Adityadi Navagraha Stotra

Latest update : June 25, 2012

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# સોમસ્તોત્રમ્

અથ સોમસ્તોત્રપ્રારમ્ભઃ ।
અસ્ય શ્રીસોમસ્તોત્રમહામન્ત્રસ્ય ગૌતમ ઋષિઃ । અનુષ્ટુપ્છન્દઃ ।
સોમો દેવતા । સોમપ્રીત્યર્થે જપે વિનિયોગઃ ।

વાં અઙ્ગુષ્ઠાભ્યાં નમઃ । વીં તર્જનીભ્યાં નમઃ ।
વૂં મધ્યમાભ્યાં નમઃ । વૈં અનામિકાભ્યાં નમઃ ।
વૌં કનિષ્ઠિકાભ્યાં નમઃ । વઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
વાં હૃદયાય નમઃ । વીં શિરસે સ્વાહા ।
વૂં શિખાયૈ વષટ્ । વૈં કવચાય હુમ્ ।
વૌં નેત્રત્રયાય વૌષટ્ । વઃ અસ્ત્રાય ફટ્ ।
ભૂર્ભુવઃ સુવરોમિતિ દિગ્બન્ધઃ ।
ધ્યાનમ્ ।
શ્વેતામ્બરોજ્જ્વલતનું સિતમાલ્યગન્ધં
   શ્વેતાશ્વયુક્તરથગં સુરસેવિતાઙ્ઘ્રિમ્ ।
દોર્ભ્યાં ધૃતાભયગદં વરદં સુધાંશું
   શ્રીવત્સમૌક્તિકધરં પ્રણમામિ ચન્દ્રં  ॥ ૧॥

આગ્નેયભાગે સરથો દશાશ્વશ્ચાત્રેયજો યામુનદેશજશ્ચ ।
પ્રત્યઙ્મુખસ્થશ્ચતુરશ્રપીઠે ગદાધરો નોઽવતુ રોહિણીશઃ ॥ ૨॥

ચન્દ્રં નમામિ વરદં શઙ્કરસ્ય વિભૂષણમ્ ।
કલાનિધિં કાન્તરૂપં કેયૂરમકુટોજ્જ્વલમ્ ॥ ૩॥

વરદં વન્દ્યચરણં વાસુદેવસ્ય લોચનમ્ ।
વસુધાહ્લાદનકરં વિધું તં પ્રણમામ્યહમ્ ॥ ૪॥

શ્વેતમાલ્યામ્બરધરં શ્વેતગન્ધાનુલેપનમ્ ।
શ્વેતછત્રોલ્લસન્મૌલિં  શશિનં પ્રણમામ્યહમ્ ॥ ૫॥

સર્વં જગજ્જીવયસિ સુધારસમયૈઃ કરૈઃ ।
સોમ દેહિ મમારોગ્યં સુધાપૂરિતમણ્ડલમ્ ॥ ૬॥

રાજા ત્વં બ્રાહ્મણાનાં ચ રમાયા અપિ સોદરઃ ।
રાજા નાથશ્ચૌષધીનાં રક્ષ માં રજનીકર ॥ ૭॥

શઙ્કરસ્ય શિરોરત્નં શાર્ઙ્ગિણશ્ચ વિલોચનમ્ ।
તારકાણામધીશસ્ત્વં તારયાઽસ્માન્મહાપદઃ ॥ ૮॥

કલ્યાણમૂર્તે વરદ કરુણારસવારિધે ।
કલશોદધિસઞ્જાતકલાનાથ કૃપાં કુરુ ॥ ૯॥

ક્ષીરાર્ણવસમુદ્ભૂત ચિન્તામણિસહોદ્ભવ ।
કામિતાર્થાન્ પ્રદેહિ ત્વં કલ્પદ્રુમસહોદર ॥ ૧૦॥

શ્વેતામ્બરઃ શ્વેતવિભૂષણાઢ્યો ગદાધરઃ શ્વેતરુચિર્દ્વિબાહુઃ ।
ચન્દ્રઃ સુધાત્મા વરદઃ કિરીટી શ્રેયાંસિ મહ્યં પ્રદદાતુ દેવઃ ॥ ૧૧॥

ઇદં નિશાકરસ્તોત્રં યઃ પઠેત્ પ્રત્યહં નરઃ ।
ઉપદ્રવાત્સ મુચ્યેત નાત્ર કાર્યા વિચારણા ॥ ૧૨॥

ઇતિ સોમસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by KSR Ramachandran ramachandran_ksr at yahoo.ca

*somastotraM*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*